CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिशिष्ट 'क'

श्रीहनुमन्मन्त्रविवरणम् (सुदर्शनचक्रराजसंहितायाम्)

(वा० सं० वि० वि० सरस्वती भवन पुस्तकालय पाण्डुलिपि सं० २५५५१ की प्रतिलिपि)

॥ श्रीगणेशायनमः ॥

अथ पूजाविधानार्थं यंत्रं तत्कथ्यतेऽधुना ।
षट्कोणवसुयंत्रं च चतुरस्त्रं च वाह्मतः ॥
वीजयुक्तिलिखेत्सम्यक् नामलेख्यं हनूमतः ।
षट्कोणेषु षडंगानि वीजयुक्तानि संलिखेत् ।
बीजमंत्रं च कोणाग्रे लिखेत्सम्यक् पुनस्तथा ।
अंजनीपुत्राय तथा ततो वै रुद्रमूर्त्तये ।
तथा वायुसुतायेति जानकीजीवनाय च ।
रामदूताय ब्रह्मास्त्रनिवारणाय तत्परं ।
षट्कोणस्यांतरालेषु संलेख्यं नामषट्ककं ।
वसुपत्रे च वीजानि नामानि च समालिखेत् ।
सुग्रीवायांगदायाथसुखेनाय ततः परं ।
नलाय चाथनीलाय तथा जांबवतेपरं ।
प्रहस्ताय सुवेषायादलमध्येषु संलिखेत् ।
रामभक्तो महातेजाः कपिराजो महाबलः ।
द्रोणाद्रिहारको मेरुपीठकार्चनकारकः ।
दक्षिणा.....भास्वरश्च सर्वविघ्ननिवारकः ।
दलान्तरेषु लेख्यानि नामान्यष्टौ च यत्नतः ।
लोकपालांसायुधां.....चतुरस्त्रै च संलिखेत् ।
रक्षोघ्नाय द्विषघ्नाय रिपुघ्नाय तथैव च ।
व्याधिघ्नाय ज्वरघ्नाय भूतघ्नाय ततः परं ।
कृत्याग्रहवलघ्नाय कुलिशघ्नाय शेषतः
सर्पव्याघ्र-महाचौरभयघ्नाय चिदात्मने ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मग्रह महाराजकोपघ्नाय निरंतरं ।
रामप्रियाय रुद्राय रामभक्तिरतायच ।
भक्तप्रियाय जगति दुर्भिक्षार्त्तिनिवारणे ।
पार्थाय संगरानंत शक्ति-विक्रमवर्द्धिने ।
इत्येतद्दिक्षु संलेख्यं स्तुत्याख्यां नामसंघकं ।
एवं यंत्रवरे सम्यक् पूजा कार्या प्रयत्नतः ।
अप्राप्यं वांछितं सम्यक् प्रापयत्येव निश्चितं ।
अधुना प्रतिमायंत्रं कथ्यते तन्निशामय ।
कपीश्वरस्य रूपं च समालेख्यं प्रयत्नतः ।
वस्त्रे वाकागले वाथमस्या वालक्तकेन वा ।
हिंगुलेनाथवान्यैश्च द्रव्यैः सम्यक् सुशोभनं ।
तत्रैव क्रमयोगेन साध्यनामाक्षराणि च ।
प्रथमं हृदये लेख्यं द्वितीयं मस्तके तथा ।
तृतीयं दक्षिणेबाहौ भुजे वामे चतुर्थकं ।
पंचमं च तथा षष्ठं पाण्योर्दक्षिणसव्ययोः ।
वदरे सप्तमे चैव दक्षोरौवाष्टमं मतं ।
वामोरौ नवमंचैव दशमं पक्षपत्तले ।
एकादशं समालेख्यं वामपादे तलं तथा ।
एवंक्रमेण संलेख्यं वर्णानां च समूहकं ।
वश्ये द्वेषे स्तंभने च मारणे मोहने तथा ।
आकर्षणे बंधमुक्तो विजये च विशेषतः ।
द्वादशाक्षर-विद्यायास्तदक्षरयुतं लिखेत् ।
मंत्राद्यं बीजषट्कं च चतुर्थ्यंतं नमोंतकं ।
तन्नामकथिता विद्या द्वादशाक्षरवर्णिका ।
वश मानय संलेख्यं वश्येवाम्रेडितान्वितं ।
विद्वेषणायाम्रेडितं विद्विषे समुदीरितं ।
आम्रेडितं स्तंभयेति स्तंभने समुदीरितं ।
आम्रेडितं मारयेति मारणे समुदाहृतं ।
आम्रडितं मोहयेति मोहनेतं समुदाहृतं ।
आम्रेडितं मोक्षयेति मोक्षणे समुदीरितं ।
एवंविधं तु संलेख्यं प्रतिमा यंत्रमुत्तमं ।
साध्याकृतिं वस्त्रमयीं कृत्वा पूर्ववदुत्तमां ।
रक्तांजनेन संप्रोक्ष्य स्मद्रं कृत्वा प्रयत्नतः ।
क्षीरेण नवनीतेन दग्धा वान्येन केनचित् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राणानां स्थापनं कृत्वा रोषणोच्चाटनं कृतं ।
नामोद्देशेन च रिपोः पीडयेदाकृतिं तु तं ।
तद्रक्त पानं वै कारयेन्मृत्युहेतवे ।
अथवाग्नौ क्षिपेत्तां तु चैत्ये मारणहेतवे ।
एवं कृत्वा रिपोः सत्यं मृत्युर्भवति नान्यथा ।
प्राणप्रतिष्ठापूर्वं तु संपूज्य निक्षिपेद् भुवि ।
साध्यस्य द्वारदेशे तु निखन्याच्च महामतिः ।
अथवा भूतले लेख्यं प्रतिभायंत्रमुत्तमं ।
तत्रेमं श्लोकसंदर्भं साध्यनामं लिखेद् ध्रुवम् ।
संमार्ज्यपुनरालेख्यं तथैव च पुनः पुनः ।
एवमष्टोत्तरशतं लेखनावृत्तिरिष्यते ।
वृत्तिः संमार्जनस्यापि तावत्येव विधीयते ।
यद्यत्कार्यं समासाद्य तथा पल्लवयोजना ।
कार्यस्य पूरिका एता ज्ञातव्या मंत्रणा ध्रुवं ।
अथयंत्रप्रवादि। द्वेषकारक ।
कार्यभंजकेति पदं क्रूरप्रकृतिकं पदं ।
प्रवृद्धकोपावेशिक हंतुवै तत्पदं तथा ।
कामुकादीनितिपदं दूरस्थेति पदां ततः ।
समीपस्थान्भूतभविष्यद्वर्तमानांतथोच्चारयेत् ।
पुंस्त्रीन् पुंस्काश्चातुर्वर्ण्यान् क्षणेन सत्वरं ।
हनद्विधा दहद्विधा संहारय द्विधावद ।
मोहयेति द्विधा वाच्यंमदयेत्ति द्विधा ततः ।
हिंसयेति पुनश्चोत्कां मार्ज्जारमूषकेति च ।
वत्सद्यः प्राणैश्च ततो विनियोजय द्विधोच्चरेत् ।
विध्वंसय द्विधा त्रिति द्विधा)
(मूकयपौनरुक्त्याजारयेति वंधयेति द्विधा ततः ।
जृंभयेति द्विधाचोक्त पातयेति द्विधा वद ।
ततो ममपदं चोक्त्वा परस्य) च पदे ततः ।
पादतलाक्रमितांकुरुद्वंद्वंतोवंद दासीभूतान्संपादयद्विधा ।
हाच त्रिमोच्चरेत् क्रोधंत्रिधार्यंयेत्रिधाकव-
चास्त्राग्निवल्लभा ।
वर्णानां द्विशतं प्रोक्तं पंचषष्युत्तरं मनौ ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विद्वेष वैरिदुष्टानां क्रूरबुद्धि विनाशने ।
मंत्रोयं गदितः सत्यं गुरुभिः मंत्रिपारगैः ।
विशिष्यते-कलौ सत्यं प्रत्ययायाल्पबुद्धयो ।
महारुद्रात्मतास्य जगत्प्राणात्मजस्य च ।
मनुं विद्धि वरिष्ठं च सर्वसिद्धिप्रदं नृणां ।
वारिमंत्राद्यभिमंत्र्य प्रविकिरेत्सर्वत्र च सुसाधकः ।
तल्लंघनाद्भवंत्येव सर्वदुष्टास्तु सेवकाः ।
एकादशोक्तबीजानि प्रथमं समुदीरयेत् ।
नमो हनुमतेचोक्ता त्रैलोक्याक्रमणेति च ।
पराक्रमेति श्रीरामभक्तः ममपरस्य च ।
सर्वशत्रून् सर्ववर्ण-संभवानितिवै वद ।
पुंस्त्रीनपुंसकान् भूतभविष्यद्वर्तमा इति ।
नानादूरस्थ समीपस्थान् नाना इति ततो वद ।
नामधेयांस्ततो नाना संकेरेति च जातिजान् ।
कलत्र--पुत्रमित्रेति मृत्यबन्धुसुहृत्ततः ।
समेतान्प्रमुशक्तीति सहितानि ततः परं ।
धनधान्यादि-संपत्तियुतान् राज्ञः परंतप ।
राजसेवन् मंत्रिपदं सचिवेति स ततः ।
आत्यंतेकं क्षणेनेति त्वरयैतद्विनावधि ।
नानापायैरितिपदेन्ततो मारय युग्मकं ।
शस्त्रैश्छेदय युग्मं च अग्निनाज्वालय द्विधा ।
दाहयेति द्विधावाच्यं अक्षय्येति ततो वद ।
कुर्मरदस्यादाक्रमणेन शिलातलं ।
आत्राटय द्विधावाच्यं घातयेति द्विधा वद ।
वधयुग्मं भूतसंघः सहभक्षय युग्मकं ।
क्रुद्धयेत् सेति नखैर्विदारय द्विधा वद ।
देहांशादस्मादिति तत उच्चाटय द्विधा वद ।
पिशाचवद् भ्रंशयेति द्विधा भ्रामयेति द्विधा ।
भयातुर संज्ञाश्च सद्यः कुरु युगं वद ।
भस्मीभूतान् द्विधावाच्यमुद्धूय पुनर्वद ।
भक्तजन-वत्सलेति सीता शोकापहारक ।
सर्वत्र मांतथैन च रक्ष युग्मं च हात्रयं ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रोधत्रयं क्षेत्रयं कवचास्त्राग्निवल्लभः ।
एकचत्वारिंशदुत्तराण्यपित्रिशतान्य च ।
वर्णानांगणनाज्ञेया दुष्टारिद्वेषणं तथा ।
उच्चाटय मृत्युपैशाच्यं करणीयं मनुध्रुवं ।
सप्रत्ययः समर्थश्च कलौ भक्तेप्सितार्थकृत् ।
श्रद्धया नियमेनाथ सस्मृतो जपितः खलु ।
कार्यं साधयते नूनं सत्यं वतान्यथा ।
हनुमद्वीर्यसामर्थ्याद् दुर्ज्जयो मंत्रविद् भवेत् ।
आदावेकादशोक्तानि बीजानि समुदीरयेत् ।
पुनर्वेदादि मंत्रोक्तान्नमो हनुमते ततः ।
प्रकटेति तश्चोक्त्वा पराक्रम पदं ततः ।
आक्रांत पदमेतत्तु दिङ्मंडल पदं ततः ।
यशोवितानेति पदं धवलीकृत वै वद ।
जगत्त्रितयवज्रेति देहज्वलदितीरयेत् ।
अग्निसूर्यकोटिसमप्रभतनस्तनूरुह ।
रुद्रावतारतो लंका पुरीदहन वै ।
उदधिलंघन ततो दशग्रीवशिरस्ततः ।
कृतांतक सीताश्वासन ततो वायुसुतेति च ।
अंजनीगर्भसंभूत श्रीरामेतिपदं ततः ।
लक्ष्मणानंदरेति कपिसैन्यपदं वद ।
प्राकारसुग्रीवपदं सख्यकारणवैततः ।
वालिनिर्वहणपदं कारणेति ततो वद ।
द्रोणपर्वतोत्पाटन ततो वदेत्परं पदं ।
अशोकवन चेतत्तु विदारण पदं ततः ।
अक्षयकुमारकेति छेदनेति ततो वद ।
वनरक्षाकरपदं समूह इति चोत्तर ।
विभजनब्रह्मास्त्रेति ब्रह्मशक्ति पदं वद ।
असनेति लक्ष्मणेति शक्तिभेद-निवारण ।
शल्यविशल्यौषधीति समानयनवैततः ।
बालोदितभानु पदं मंडलय समेति च ।
मेघनादं होमपदं-विध्वंसन ततः परां ।
इन्द्रजिद्वधकारण सीता रक्षक-वैपदं ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततश्च राक्षसीसंघ विदारण पदं ततः ।
कुंभकर्णाय वधेति परायण पदं वद ।
श्रीरामभक्तितत्पर समुद्रेति ततः पदं ।
व्योमद्रुमलंघनेति महासामर्थ्य वै पदं ।
महातेजः पुंजपदं विराजमान वै पदं ।
स्वामिवचनेति पदं संपादिताऽर्जुनेति च ।
संयोग सहायेति च कुमारेति पदं ततः ।
ब्रह्मचारिन्निति पदं गंभीरेति पदं ततः ।
शब्दोदय दक्षिणाशा मार्तण्डमेरु पदं ।
पर्वतपीठिकार्चन सक्तेति पदं ततः ।
मंत्रागमाचार्य पदं ममसर्वग्रहेति च ।
विनाशनं सर्वपदं ज्वरोच्चाटन सर्व वै ।
विषनाशन सर्वापत्तिनिवारणेति च ।
सर्वदुष्टानि पदं निवर्हणपदं ततः ।
सर्पव्याघ्रादि भयेति निवारण पदं ततः ।
सर्वशत्रुछेदनेति पदं ममपरस्य च ।
ततस्त्रिभुवनेपुंस्त्रीनपुंसकात्मकं पदं ।
ततः सर्वजीवजातं वशयेति द्वयं वदेत् ।
ममाज्ञाकारकं चैव संपादय द्विधा वद ।
ततोनानानामधेयान् सर्वराज्ञः पदं वद ।
ततः सपरिवारांश्च वदेति ममसेवकान् ।
कुरुयुग्मं सर्वपदं शस्त्रास्त्रेति विषाणि च ।
विध्वंसय द्विरुच्चार्य मायां पूर्ववदुच्चरेत् ।
हा त्रिधा च समुच्चार्य तद्वहेहि त्रिधोच्चर ।
पूर्वोदितं पक्वकूटं वेश्वरीत्येन वोच्चरं ।
सर्वशत्रूहनद्वंद्वपरवलानि ततः परं ।
परसैन्यानि क्षोभय द्विधा मम पदं ततः ।
ततः सर्वकार्यघातं साधयेति द्विधा वद ।
सर्वदुष्टदुर्ज्जनेति मुखानि कीलय द्विधा ।
घेत्रियोच्चरहारं त्रिधा क्रोधं त्रिधा ततः ।
त्रिधाचास्त्रवहिन्नाथय संयुतोयं मनुःस्मृतः ।
मंत्रेवर्णाः समाख्याताः द्विनवत्युत्तराः खलु ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पंचशतानि सत्यं हि मंत्रविद्भिः पुरातनैः ।
सर्वकार्यार्थसंसिद्ध्यै प्रोक्तोयं हनुमन्मनुः ।
द्वादशाक्षरविद्याया विवृतिः क्रियते ऽधुना ।
शिवमिद्र स्वराक्रान्तं विंदुमत्कुरु वादिमं ।
पूर्वोदितं पंचकूटं बीजषट्कं ततो वद ।
हनुमांश्चचतुर्थ्यायं योज्योनंतिः पुरःसरम् ।
द्वादशार्णा महाविद्या प्रख्यकस्यापि मा वद ।
रहस्यं ते मया ख्यातं वाल्मीकि मुनिनोदितं ।
ऋष्यादिकं सर्वमेव पूर्वमेव निवेदितं ।
एकमेव हि सर्वेषां सत्यं सत्यं च नान्यथा ।
विशेषोत्रिषडंगानि षट्कण्टैः कुरु राघव ।
करांगुलिषु विन्यासः कार्यमित्यं शुभो मतः ।
मंत्र पदैरष्टभिश्च देहांगेषु संमतः ।
मूर्द्धिनभालेमुखे स्वांते नाभापूर्व्वोस्तु जंघयोः ।
पादयोश्चैव कर्त्तव्यो ध्यानं पूर्वोदितं कुरु ।
मुद्राः पूर्वोदिताः कार्याः सर्व्वमेव हि पूर्ववत् ।
वानरीचास्यिमुद्रान्या तां शृणुष्व वदाम्यहं ।
करौ संपुटितौ कृत्वा समश्लिष्टांगुली स्फुटं ।
प्रलोपितौ च अंगुष्ठावंतगर्भं स्थितौ कुरु ।
हृदयोपरिविन्यस्तौ मुकुलाकृति संयुतौ ।
स्वामिपाद स्थिता दृष्टि र्मुद्रांपर्यंतास्थिता ।
प्रोक्तोयं वानरीमुद्रा चैतन्मंत्रजपे स्थिता ।
इत्थं सर्वं निगदितं हनुमन्मंत्रगह्वरं ।
श्रद्धया परया भक्त्या सेवितोखिल सिद्धिदः ।

इतिश्रीसुदर्शनराजचक्रराजसंहितायांहनुमन्मंत्रविवरणेमंत्रोद्धाराख्यः प्रथमःपटलः ।

ततोस्तंसमारभ्य यावन्सूर्योदयो भवेत् ।
तावन्मंत्रं जपेद्रात्रौ कार्यमुद्दिश्य मंत्रवित् ।
पुरश्चर्यास्य मंत्रस्य प्रोक्ता चार्कसहस्रका ।
भौमस्यनासने पूजा कार्या हनुमतो ध्रुवं ।
प्रियंगवो व्रीहयोथ हृद्याज्यक्षीर संयुताः ।
कदली मार्तुलुंगाम्र फलै र्हुनेत् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दशांशेन ततो ब्रह्मचारिणो भोजयेद् ध्रुव ।
द्वाविंशति च संख्याकान् हनुमत्प्रीतये सुधां ।
अष्टोत्तरं शतनामं छेत्रयेद् भस्मवारि च ।
ग्रहदोषे विषेचैव मार्जयेत्पातयेत्तनुं ।
हनुमत्प्रतिमा कार्या ततो भूतांकुशस्य च ।
पूर्वोत्तरगतेनैव मूलेनांगुष्ट नामतः ।
सर्वावयव संपन्नावित्तप्राशस्त्य कारिणी ।
प्राणसंस्थापनं तस्यां कृत्वावै मारुते ध्रुवं ।
सिंदूरचर्चितां कृत्वा तथाम्यवेपि चारकैः ।
मंत्रितानेन मंत्रेण ततस्तां द्वारसाधके ।
खनित्वा निक्षिपेद् भूमौ गृहस्याभिमुखं निशि ।
भूतजा विषजा बाधा ग्रहजा कूटमन्त्रजा ।
वेटकादिभवावापि व्याधिज्वरविघातजा ।
चोराग्निबाधा च तथा नभवेतद् गृहेरिजा ।
तद्गृहं नंदते सर्वसमृद्ध्या संयुतं तदा ।
रात्रौरात्रौ जपेन्मंत्रं षट्शतं त्रिशतं तथा ।
दशवासरपर्यन्तं राजशत्रुभयं हरेत् ।
अभिचारज्वरे भूतज्वरं च भस्मना तनुं ।
मंत्रितेनाम सावाथ ताडयेद् घोषपूर्वकं ।
त्रिदिनाज्वर मुक्तिः स्यान्नात्र कार्या विचारणा ।
औषधेरसमंत्रं दशवारं जपेद्बुधः ।
तेनाभिमंत्रितं दत्तं सर्वं सफलतां व्रजेत् ।
शस्त्रधाराग्र संस्थस्तंभेशतशवारं जपेद् बुधः ।
तेनाभिमंत्रिते तोयं भस्मतस्य प्रदापयेत् ।
भस्मना चर्चितं देहं पयश्च प्रदशं स-
श्वस्तझोभवेतस्य सत्यं सत्यंनसंशयः ।
शस्त्रक्षतेषु लूतासु रक्तग्रन्थादिसम्भवे ।
भस्मना पयसा तत्र त्रिवारंचाभिमन्त्रयेत् ।
न व्यथा न च पूयंस्यात् संशोषयति सव्रणं ।
सप्तवासरपर्यन्तं विद्वेषोच्चाटने तपः ।
सूर्यास्ते च समारभ्य कारयेत्सुबुधोत्तमः ।
अरुणोदयपर्यन्तं भस्मकीलामिमन्त्रितं ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तद्वारे पूरितं गेहे रोपितं वापि तत्क्षणात् ।
ततस्तस्योदनं स्यात्परिवार युतस्य च ।
पुत्रादिभिः सर्वलोकैः पौरैर्जनपदैः सह ।
विद्विष्यतेप्राणघातं सत्यं सत्यं वचो मम ।
भस्माभिर्मंत्रितं यस्य देहेचन्दन मिश्रितम् ।
चर्चितम्पेयखाद्यादि योजितं यत्र दापितम् ।
स वश्यो जायते नूनं प्राणैरपि धनैरपि ।
दासतां याति देवोपि मनुष्येषु च का कथा ।
क्रूरसत्वानि सर्वाणि वशयेदमुना खलु ।
प्रकारेणमहावीराः ज्वलनाः शान्तितामियात् ।
दिव्यस्थाने च कर्त्तव्यं निःशक्तिश्च हुताशनः ।
भवत्येव न संदेहो लोहतैलेषु संस्थिता ।
मारणे क्रुद्धचित्तेन रात्रौ श्मशानभूतले ।
रिपोः प्रतिकृतिङ्कृत्वा भस्मना वा मृदा तथा ।
पूर्ववत्प्राणसंस्थां च कृत्वा मंत्रेण मन्त्रवित् ।
प्रतिमाहृदि तन्नाम लेख्यञ्चैव प्रयत्नतः ।
शस्त्रमेदं प्रतिमन्त्रोच्चारंकुर्य्याद्विधा पुनः ।
छिन्धि भिन्धि मारयेति तन्नामान्ते समुच्चरेत् ।
एवं सप्तदिनान् कुर्वन्दन्तैरोष्ठम् प्रपीड्य च ।
कृत्वा प्रपीडनं पाणितलयो र्दृढमात्मनः ।
होमः कार्यस्तत्र चाथ राजिकालवंकुणैः सह ।
उन्मत्त फलपुष्पैश्च श्लेष्मांतक विभांतकैः ।
विषरोमनखैर्वापि काककौशिकगृद्धकैः ।
पक्षैः कटुकतैलाक्तै र्भवेच्चन्द्राकृतौ हुनेत् ।
स्थंडिले मुक्तकेशस्तु स्तंकार्यामुद्रयाम् बुधः ।
दक्षिणाभिमुखो भूत्वा पल्लवोच्चारणं कुरु ।
त्रिंशतावृत्तिहोमेन सप्तवासर मध्यतः ।
शत्रुमृत्युमवाप्नोति रुद्रेणापि सुरक्षितं ।
दिनत्रयं रात्रिभागे श्मशानेषटशं जपेत् ।
प्रेतमुत्थापयेत्सत्यं वेतालः किंकरो भवेत् ।
शुभाशुभं च वदति मन्त्रिणा सहनिश्चयात् ।
भाषान्ददाति सत्यं च कारयिष्यति करिष्यति ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भस्माम्बुममन्त्रितं रात्रौ सहस्रावृत्तिकं खलु ।
दिनत्रयं ततश्चैव तत् क्षिपेत्प्रतिमासु च ।
यासु कासु च स्थूलासु लघुष्वपि विशेषतः ।
मन्त्रप्रभावात्तत्तच्च तन्नूनभवत्येव न संशयः ।
मन्त्रेणानेन सिद्धेन यदसाध्यञ्च साधयेत् ।
वश्ये भये विवादे च शस्त्रे सङ्ग्रामसंकटे ।
द्यूते दिव्ये स्तम्भने च विद्वेषे मारणे तथा ।
मृतकोत्थापनं चै.....चालने ध्रुवं ।
विषे व्याधौ ज्वरे भूते ग्रहे कृत्यादिमोचने ।
क्षतेग्रन्थौ महारण्ये दुर्गे व्याघ्रे च दन्तिनि ।
क्रूरसत्वेषु सर्वेषु शस्त्रबन्धे विमोक्षणे ।
बन्धमोक्षे मारणे मोहे शान्तौ नियोजयेत् ।
मन्त्रमेनं हनुमतो नानाकार्य प्रसाधनम् ।
बन्धमुक्तौ जपेन्मन्त्रं रात्रौरात्रौ च निर्भयः ।
निखित्वा प्रतिमाम्भूमौ मारुतेरस्खलन्नरः ।
स्वनामाक्षरसंघं तु द्वितीयान्तं समालिखेत् ।
मंत्रस्यान्ते तथा मां च विमोचय विमोचय ।
मार्जयेद्वामहस्तेन तथैव च लिखेत् पुनः ।
एवमष्टाधिकशतः लेखयेत् मार्जयेन्नरः ।
एवं कुर्यान्निबद्धो यः शृंखलाभिर्दृढो नरः ।
महापराधसंयुक्तोऽनर्थकारी तु प्राणहा ।
सप्त-दिन-मध्येतु बन्धनान्मुच्यते सुखं ।
हनुमान् ध्वंसयत्याशु ह्याय संमोक्षयेन्नरः ।
न तं दण्डयितुं शक्तो राजानो रिपवोजनाः ।
हवनान्यपि सन्त्येव दशांशेन निबोध तत् ।
स्तंभने च न कामावा न्यग्रोधस्य फलानि च ।
हरिद्रा च तथा प्रोक्ता तालकः सल्लकी फलं ।
शल्मली - कुसुमान्याहुर्मधुत्रय - समन्वितं ।
उच्चाटे गदितास्तत्र श्लेष्मांतक विभीतकाः ।
वश्यार्थं सर्षपाद्राक्षा मधुकानि च गुग्गुलः ।
विद्वेषे करवीराणां पत्राणि समिधः स्तथा ।
श्लेष्मांतकविभीतानां समिधौ जीरकन्तथा ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मरीचं रामठंचैव कटुतैलसमन्वितं ।
ज्वरे तापे च शूले च गण्डमाला भगन्दरे ।
दूर्वागुडूचीखण्डानि साज्यं क्षीरदधीनि च ।
शूले त्वेरण्डसमिधः कुबेराक्षी तथैव च ।
निर्गुण्डीसमिधश्चैव तिलतैलसमन्विताः ।
लक्ष्मीप्राप्तौ सराजानि विल्वपत्राणि चैव हि ।
समिधस्तस्य होतव्या मधुत्रयसमन्विताः ।
पंचखाद्यं नारिकेलमिक्षवः कदलीफलं ।
सर्वसन्तोषकृद्धोमो मधुत्रयसमन्वितः ।
सुखसौभाग्यसंपत्ति साधकं हवनं शृणु ।
कर्पूरं केसरं नागरोचनं चन्दनं तथा ।
तजपत्रं वारणं च लवङ्गैलागुरु तथा ।
मांसी नखं जातिपत्रं तत्फलं लोहवाणकं ।
साज्यान्येतानि सर्वत्र विज्ञेयानि मनीषिभिः ।
पुष्पैः सुगन्धिभिर्वासः प्राप्यते चोत्तमोत्तमः ।
द्रोहे च मारणे चैव विषं च राजिका तथा ।
काककौशिकगृध्राणां पक्षाश्च विजया तथा ।
गृहधूमकराश्चैव लवणं कटुतैलकं ।
पादपांशु तथा राजी लवणं कर्षणे स्मृतं ।
उन्मत्तफलपुष्पाणि समिधो मोहने स्मृताः ।
धान्यैः संप्राप्यते धान्यमन्नेनान्न समृद्धयः ।
तिलाज्यक्षीरदधिभिः महिषीगोसमृद्धयः ।
एवं नानाप्रयोगाश्च साधयेन्मंत्रवित्तगः ।
पुरश्चर्यां जपेनैव हनुमन्तं समर्च्चयेत् ॥
इतिश्री सुदर्शनचक्रराजसंहितायां हनुमन्मन्त्रविवरणे
हनुमन्मन्त्रप्रयोगसाधनाख्यो द्वितीयः पटलः ॥

॥ शुभमस्तु ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.